shrImInAkShImaNimAlAShTakam

श्रीमीनाक्षीमणिमालाष्टकम्

Document Information

Text title : Shri Minakshi Manimala Ashtakam 08 18

File name : mInAkShImaNimAlAShTakam.itx

Category : devii, devI, aShTaka, mInAkShI

Location : doc_devii

Proofread by : Jonathan Wiener, NA, Rajesh Thyagarajan

Description/comments : From stotrArNavaH 08-18

Latest update : August 15, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 18, 2023

sanskritdocuments.org

shrImInAkShImaNimAlAShTakam

श्रीमीनाक्षीमणिमालाष्टकम्

मधुरापुरिनायिके नमस्ते
मधुरालापिशुकाभिरामहस्ते ।
मलयध्वजपाण्ड्यराजकन्ये
मयि मीनाक्षि कृपां विधेहि धन्ये ॥ १॥

कचनिर्जितकालमेघकान्ते
कमलासेवितपादपङ्कजान्ते ।
मधुरापुरवल्लभेष्टकान्ते
मयि मीनाक्षि कृपां विधेहि शान्ते ॥ २॥

कुचयुग्मविधूतचक्रवाके
कृपयापालितसर्वजीवलोके ।
मलयध्वजसन्ततेः पताके
मयि मीनाक्षि कृपां निधेहि पाके ॥ ३॥

विधिवाहनजेतृकेलियाने
विमतामोटनपूजितापदाने ।
मधुरेक्षणभावभूतमीने
मयि मीनाक्षि कृपां विधेहि दीने ॥ ४॥

तपनीयपयोजिनीतटस्थे
तुहिनप्रायमहीधरोदरस्थे ।
मदनारिपरिग्रहे कृतार्थे
मयि मीनाक्षि कृपां विधेहि सार्थे ॥ ५॥

कलकीरकलोक्तिनाददक्षे
कलितानेकजगन्निवासिरक्षे ।
मदनाशुगहल्लकान्तपाणे
मयि मीनाक्षि कृपां कुरु प्रवीणे ॥ ६॥

मधुवैरिविरिञ्चिमुख्यसेव्ये
    मनसा भावितचन्द्रमौलिसव्ये ।
तरसा परिपूरितयज्ञहव्ये
    मयि मीनाक्षि कृपां विधेहि भव्ये ॥ ७॥

जगदम्ब कदम्बमूलवासे
    कमलामोदमुखेन्दुमन्दहासे ।
मदमन्दिरहारिदृग्विलासे
    मयि मीनाक्षि कृपां विधेहि दासे ॥ ८॥

पठतामनिशं प्रभातकाले
    मणिमालाष्टकमष्टभूतिदायी ।
घटिताशतचातुरीं प्रदद्या-
    त्करुणापूर्णकटाक्षसन्निवेशात ॥ ९॥

इति श्रीमीनाक्षीमणिमालाष्टकं सम्पूर्णम् ।

With little variation

श्रीमीनाक्षीमणिमालाष्टकम् ।

मधुरापुरनायिके नमस्ते मधुरालापशुकाभिरामहस्ते ।
मलयध्वजपाण्ड्यराजकन्ये मयि मीनाक्षि कृपां निधेहि धन्ये ॥ १॥

कचनिर्जितकालमेघकान्ते कमलासेवितपादपङ्कजान्ते ।
मधुरापुरवल्लभेष्टकान्ते मयि मीनाक्षि कृपां निधेहि दान्ते ॥ २॥

कुचयुग्मविभिन्नचक्रवाके कृपया पालितसर्वजीवलोके ।
मलयध्वजसन्ततेः पताके मयि मीनाक्षि कृपां निधेहि पाके ॥ ३॥

तपनीयसरोजिनीतटस्थे तुहिनप्रायमहीधरोदरस्थे ।
मदनारिपरिग्रहे कृतार्थे मपि मीनाक्षि कृपां निधेहि सार्थे ॥ ४॥

मधुवैरिविरिञ्चिमुख्यसेव्ये मनसा भावितचन्द्रमौलिलव्ये ।
मनसापनिहीतयज्ञहव्ये मयि मीनाक्षि कृपां निधेहि भव्ये ॥ ५॥

कलकीरकलोक्तिनाददक्षे कलितानेकजगन्निवासकुक्षे ।
मदनाशुगहल्लकान्तपाणे मयि मीनाक्षि कृपां निधेहि शोणे ॥ ६॥

विधिवाहनचैत्रकेलियाने विमतामोटनपूजितापदाने ।

मधुरेक्षणभावपूतमीने मयि मीनाक्षि कृपां निधेहि दीने ॥ ७॥

जगदम्ब कदन्बमूलवासे मधुरामोदमुखेन्दुमन्दहासे ।
मदमन्दिरचारुदृग्विलासे मयि मीनाक्षि कृपां निधेहि दासे ॥ ८॥

पठतामनिशं प्रभातकाले मणिमालाष्टकमष्टभूतिदायि ।
घटिकाशतचातुरी समिन्धे करुणापूर्णकटाक्षसन्निवेशात् ॥ ९॥

Proofread by Jonathan Wiener, NA, Rajesh Thyagarajan

shrImInAkShImaNimAlAShTakam
pdf was typeset on December 18, 2023

Please send corrections to *sanskrit@cheerful.com*